**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 3, Issue - 1, Jan-Feb – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 20/01/2020 Accepted on : 02/02/2020 Publication Date: 28/02/2020

# सुदक्षिणा-दिलीपयोः आदर्शदाम्पत्यजीवनम्
## (SUDAKSHINA-DILEEPAYOH ADARSA DAMPATYA JEEVANAM)

**डॉ.सी हेच्. पवन्कुमारः,** *संस्कृते अतिथि अध्यापकः, तेलुगु & प्राच्यभाषाविभागः,*
*आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरम्, गुण्टूरु, चरवाणी :*
*ई-मेईल्* : pavansimha1981@gmail.com

***शोधपत्रसारः*** *संस्कृतसाहित्ये कालिदासस्य स्थानं सर्वातिशायित्वेन विलसति। कालिदासप्रणीतत्वेन सुविख्यातयोः महाकाव्ययोः अन्यतरत् रघुवंशमहाकाव्यम् । अस्य हि सम्प्रति एकोनविंशतिसर्गाः प्राप्यन्ते । सश्रीकोऽपि कोशलेन्द्रो दिलीपोऽनपत्यतया तदर्थं वशिष्ठाश्रमं गच्छति । कुलगुरुस्तदर्थं सुरभीशापं निवारकं विज्ञाय तन्निमित्तं नन्दिनीसेवनायादिशति । स्वरक्षार्थं समर्पितदेहाय तस्मै नन्दिनी पुत्रप्राप्तिरूपवरं ददाति। दिनेषु गच्छत्सु सुदक्षिणा रघुं प्रसूते ।*

*भारतीययसम्प्रदायानुगते गृहस्थजीवने भार्याभर्त्रोः सम्बन्धः परस्परं मित्रवद्, बन्धुवत् परिगण्यते । अन्योन्यानुरागेण समस्तकामान्, सम्पत्तिं अन्ते प्राणान्यपि त्यक्तुं तौ दम्पत्यौ संसिद्धौ भवतः । तादृश स्वार्थरहितं, दृढं वैवाहिकबन्धं कालक्रमेण वृद्धिंप्राप्य उभयोः दम्पत्योः सन्तोषदायको अभूत् ।*

*एतादृश सर्वोत्कृष्टम्, आदर्शप्रणयदाम्पत्यजीवनं महाकविना कालिदासेन रघुवंशमहाकाव्ये सुदक्षिणा-दिलीपयोर्मध्ये अत्यन्तसुन्दरतया वर्णितम् ।*

***मुख्यांशाः*** *सन्तानार्थी दिलीपः वशिष्ठाश्रमगमनम्, वशिष्ठमहर्षिणा शापविमोचनमार्गनिर्देशः, सुदक्षिणायाः सौशील्यम्, सुदक्षिणा-दिलीपयोःअन्योन्यानुरागदाम्पत्यजीवनवर्णनम्, अपत्यपोषणविषये दम्पत्योः उत्तरदायित्वम्।*

**आमुखम् :**

*अस्माकं प्राचीनमहर्षयः विवाहसंस्कारं परमपवित्रोत्कृष्टतममिति मत्वा, तां विवाहप्रक्रियां महोन्नताशयैः पूरयित्वा दाम्पत्यजीवनस्य आवश्यकताम् उद्बोधयामासुः। यथा ऋग्वेदे -*

**“ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः ।**
**भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुरगार्हपत्याय देवाः ।।”** ।।1।।

**“इहैव स्तं मा वियौष्टं विश्वमायुर् व्यश्नुतम् ।**
**क्रीडन्तौ पत्रैरर्नप्तृभिर्मोदमानौ स्वे गृहे।।”** ।।2।। इति

*विवाहसंस्कारेण न केवलं दम्पत्योः शरीरे अपि तु आत्मा-मनः-प्राणाश्च सर्वे एकीक्रियन्ते । सोऽयं विवाहसंस्कारेविद्यमानः महोन्नतः विशेषः, परमोद्देश्यमेव च । आदर्शगृहस्थधर्मैस्सह मोक्षसाधनमेव विवाहप्रक्रियायाः अन्तिमलक्ष्यम् । सत्सन्ततिं प्राप्य, पितृणात् विमुक्तिप्राप्तिः विवाहादर्शेषु अन्यतमः ।*

*विवाहसंस्कारेण वधूवरौ विशृङ्खलस्वेच्छातः पृथक्क्रियेते । अपि च धर्मार्थकामान् सन्मार्गे आचरितुं प्रेरितौ भवतः वधूवरौ । दम्पत्योर्मध्ये परस्परानुरागं प्रकल्प्य, गृहस्थजीवनम् सन्तेषमयं कृत्वा, सत्सन्ततिं प्राप्य आध्यात्मिकोन्नतेः प्रधानकारणं भवेत् । वैवाहिकबन्धात् स्त्रीपुरुषयोर्मध्ये अनुबन्धः दृढतरो भवति । समाजे समुचितस्थानं गौरवमर्यादादयश्च संप्राप्यन्ते । तत्कारणात् प्राचीनभारतीयाः मानवजीवनयाने सम्प्रदायबद्धविवाहपद्धतेः प्राधान्यं प्रकल्पयामासुः । तादृशादर्शसम्प्रदायपरम्परायां गौरवभावेन अनुसरणम् अस्माकं संस्कारः ।*

*कालिदासमहाकविना एतादृश निर्मल-पवित्रादर्श दाम्पत्यप्रणयजीवनं रघुवंशमहाकाव्ये सुदक्षिणा-दिलीपदम्पत्योर्मध्ये सम्यक् समुपवर्णितम् । तयोर्मध्ये विद्यमानः कामप्रवृत्तिरहितः आदर्शदाम्पत्यजीवनवर्णनमेव मदीयशोधपत्रस्य मुख्योद्देश्यम् ।*

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 3, Issue - 1, Jan-Feb – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 20/01/2020 Accepted on : 02/02/2020 Publication Date: 28/02/2020

1. *द्रः- ऋग्वेदः* - X *(मण्डलम्)* - 85 *(सू)* - 36 *(मं)*
2. *द्रः- ऋग्वेदः* - X *(मण्डलम्)* - 85 *(सू)* - 42 *(मं)*

## 1. सन्तानार्थी दिलीपः वशिष्ठाश्रमगमनम् :-

*महोन्नतशक्तिसम्पन्नः, अखण्डैश्वर्यभोगी चक्रवर्तिनः अपि अपत्याभावेन नितरां दुःखमग्नः दिलीपः पुत्रकामनया स्वकुलगुरोः वशिष्ठस्य वचनं श्रुतिगोचरीकर्तुं धर्मपत्न्या सुदक्षिणया सह गुरोराश्रमं जगाम । गुरवे नमस्कृत्य, हे तपोधन ! अहं यज्ञयागादीन् सम्यक् कृत्वा देवऋणात् विमुक्तवानस्मि । किन्तु सन्तानराहित्यकारणात् पितृणात् नैव विमुक्तोऽस्मि । तपोदानादि पुण्यकार्याणि केवलं परलोकसुखकराण्येव, किन्तु, सत्सन्ततिःइहपरलोकसाधकमेव । यथा-*

**“लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।**
**सन्ततिः शुद्धवंश्या तु परत्रेह च शर्मणे” ।।** ।।1।। *इति ।*

*अनेनकारणेन “हे गुरुदेव ! सत्सन्तानप्राप्त्यर्थं तरुणोपायं मे वदतु, अहमाचरामि” इति मुहुर्मुहुः दिलीपः विनयारूढस्सन् अभ्यर्थयामास।*

## 2. वशिष्ठमहर्षिणा शापविमोचनमार्गनिर्देशः

*दिलीपस्य विनयभरितवाक्यैः, अपत्यावाप्तये तस्य वेदनां च दृष्ट्वा वशिष्ठः अतीवप्रसन्नोभूत्वा, दिलीपमहाराजस्य सन्तानप्रतिबन्धकारणं कामधेनोः शापमिति दिव्यदृष्ट्या ज्ञात्वा, स्वकीयाश्रमे विद्यमाना कामधेनोः पुत्री नन्दिनी शुद्धान्तःकरणैः, नियमनिष्ठैः पत्न्या ह यद्याराध्यते तर्हिः राज्ञः मनोऽभीष्टासिद्धिः भवेत् इति शापावसनं परिहारोपायं च जगाद । तदा दिलीपः स्वभार्यया सुदक्षिणया सह नन्दिनीधेनुसेवां कर्तुम् उद्युक्तोऽभवत् ।*

## 3. सुदक्षिणायाः सौशील्यम्

*अन्तःपुरस्थ सुखभोगान् परित्यज्य, स्वपतिना दिलीपेन सह वशिष्ठाश्रमे कठोरम् आश्रमवासजीवनं यापयित्वा, गोपालनव्रतरता भूत्वा स्वभर्तुः दिलीपप्रयत्ने सम्पूर्णविश्वासं, गौरव भावैश्च स्थित्वा भर्तृपथं त्रिकरणशुद्ध्या अनुसृतवती आदर्शस्त्रीरत्नं सुदक्षिणा ।*

**“तस्याः खुरन्यासपवित्रपांसु मपांसुलानां धुरि कीर्तनीया ।**
**मार्गं मनुष्येश्वर धर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।”** ।।2।। *इति ।*

*प्रत्येकपुरुषस्य कार्यसाफल्याय पत्न्याः सम्पूर्णसहकाराः अपेक्ष्यते इति कालिदासहाकविना सुष्ठु निरूपितम् ।*

---

1. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम्* - I/*श्लोः*69
2. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम्* - II/*श्लोः*2
3. *सुदक्षिणा-दिलीपयोः अन्योन्यानुरागदम्पत्यजीवनवर्णनम्*

*किञ्च धेनुसेवनविषये दिलीपेनसह सुदक्षिणायाः अपि अवश्यं संसेवनं करणीयमिति वशिष्ठमहर्षेः वचनैः प्रत्येकःपुरुषः स्वकीये जीवने धर्मार्थकामान् साधयितुं स्वपत्नी गौरवभावेन समादरणीया इत्ययमंशः ज्ञेयः । यथा -*

**“सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।**
**आराधय सपत्नीकः प्रीता कामधुधा हि सा ।।”** ।।1।। *इति ।*

*नन्दिनीधनोः सेवनं कृत्वा वनप्रान्तादागतं स्वपतिं दिलीपम् अतुलितप्रेमभावेन अनिमिषाभूत्वा सा राज्ञी अवलोकयतीति कालिदासेन वर्णितम् । यथा -*

**“वसिष्ठ धेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।**

**पपौ निमेषालसपक्ष्मपङ्क्तिः उपोषिताभ्यामिव लोचनाभ्याम्।।"** ।।2।। इति ।

*नैकविधकार्यभारान् ऊढ्वा, अलसोभूत्वा गृहं प्रत्यागतवन्तं स्वभर्तारं प्रति प्रेमादरभावेन भार्या कथं वर्तनीयमिति विषयः कविना अत्र सम्यक् सूचितम् ।*

*नन्दिनिधेनोः सेवने एकविंशतितमदिनपर्यन्तं नियमपूर्वकजीवनं यापितवन्तौ तौ जायापत्यौ, धेनोः लब्धानुग्रहो भवतः । स्वकीयराज्ये प्रत्यागमनानन्तरं नन्दिन्याः अनुग्रहकारणेन सा देवी अन्तर्वत्नी अभवत् । किन्तु गर्भधारणभारमपि नैव अविगणय्य तस्मिन्नपि समये भर्तृसेवनं कर्तुं सा उद्युक्ताऽभवत् इति वर्णनं आदर्शपत्न्याः लक्षणमिति वेद्यते । यथा -*

**"सुरेन्द्रमात्राश्रित गर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः ।**
**तयोपचाराञ्जलिखिन्न हस्तया ननन्द पारिप्लवनेत्रया नृपः।।"** ।।3।। इति ।

*रत्नादिनिधीन् गर्भाधृतां वसुन्धरामिव स्वपत्नीं वीक्ष्य स दिलीपः सानुरागं, सानुकूलं च तस्याः उक्तानुक्त सकलाभीष्टान् स्वयं ज्ञात्वा पूरयामास ।*

**"उपेत्य सा दोहददुःखशील तां यदेव वव्रेतदपश्यदाहृतम् ।**
**नहीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ।।"** ।।4।। इति ।

*अस्मिन् सन्निवेशे गर्भधारणसमये स्वपत्नीं प्रति प्रत्येकपतिना कथं वर्तनीयमिति लौकिकविषयः कालिदासेन प्रबोधितः ।*

---

1. द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् - I/श्लोः81
2. द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् - II/श्लोः19
3. द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् - III/श्लोः11
4. द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् - III/श्लोः6

## 5. अपत्यपोषणविषये दम्पत्योः उत्तरदायित्वम्

*सुदक्षिणा एकस्मिन् सुमुहूर्ते पुत्रमेकं प्रासूत । नितरां सन्तुष्टान्तरङ्गः स दिलीपः तस्य पुत्रस्य 'रघुः' इति नामकरणं चकार । यथा पार्वतीपरमेश्वरौ कार्तिकेयस्य, शचीपुरन्दरौ जयन्तस्य बाल्यचेष्टाविशेषान् दृष्ट्वा प्रीता भवन्ति तथा सुदक्षिणा-दिलीपावपि बालरघोः चेष्टादिकं वीक्ष्य सन्तुष्टौ भवतः यथा-*

**"उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ ।**
**तथा नृपस्सा च सुतेन मागधी ननन्दतु स्तत्सदृशेन तत्समौ।।"** ।।1।। इति ।

*सन्तानपोषणविषये, तेषाम् अभिवृद्धौ च दम्पत्योः तुल्यं प्राधान्यं, समञ्च उत्तरदायित्वं अत्र कालिदासेन चित्रितम् । दम्पत्योर्मध्ये यद्यन्योन्यानुरागः विद्यते तर्हि सन्ततिः अत्युन्नतस्थितिम् अवश्यं प्राप्नोतीति विषयः सन्दर्भेऽस्मिन् अन्तर्लीनतया प्रस्तुतः।*

*पुत्रजन्मानन्तरमपि दिलीपदम्पत्योर्मध्ये अनुरागः लेशमात्रमपि नैव क्षीणः, अपि च विशेषरूपेण वृद्धिं गतः इति काव्येऽस्मिन् वर्णितम् । अयं विषयः दम्पत्योर्मध्ये विद्यमानः सम्बन्धः नैवशारीरकः, परंतु आत्मसम्बन्धीति ज्ञातव्यम् । एतादृशा आदर्शानुरागः नित्यनूतनः, अक्षयश्चेति विषयः कालिदासेन श्लाघितः । यथा -*

**"रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् ।**
**विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत।।"** ।।2।। इति

*सोऽयं विषयः उत्तररामचरितनाटकेऽपि भवभूतिमहाकविना अत्यद्भुततया समुपवर्णितः । यथा-*

**"अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु य**
**द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।**
**कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं**
**भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते ।।"** ।।3।। *इति*

*सन्तानराहित्य दुःखाग्निं दीर्घकालंयावत् अनुभूतवान् दिलीपः, बालभास्कर इव दिने दिने प्रवर्धमानः, विनयवीर्यादि सगुणैः प्रकाशमानस्य स्वपुत्रस्य रघोः बाल्यचेष्टाः दृष्ट्वा, तस्य प्रथमवचनान्याकर्ण्य नितरां परवशोभूत्वा, प्रेमातिशयभावेन तं कुमारं स्वाङ्कमारोप्य अतुलित पुत्रगात्रपरिष्वङ्गसौख्यमवाप ।*

---

1. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* III/*श्लोः*23
2. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* III/*श्लोः*24
3. *द्रः- भवभूतिमहाकविः - उत्तररामचरितम् -* I/*श्लोः*39

**"तमङ्कमारोप्य शरीरयोगजै स्सुखैर्निषिंचन्तमिवामृतं त्वचि।**
**उपान्तसम्मीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ।।"** ।।1।। *इति*

*उत्तररामचरितनाटकेऽपि श्रीरामः स्वपुत्रं लवम् आलिङ्गय एतादृशम् अनिर्वचनीयम् अव्यक्तानुरागसौख्यम् अवाप इति भवभूतिना समुपवर्णितम् । यथा -*

**"परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।**
**नन्दयति चन्द्रचन्दनिष्यन्दजडस्तव स्पर्शः" ।।** ।।2।। *इति ।*

*ततः परं दिलीपः स्वकुमारस्य भाविजीवनोन्नतेः उपयुक्ताः विद्याः अभ्यसनार्थं गुरुपण्डितसकाशं प्रेषयामास। लोके प्रत्येकः जनकः पुत्रेषु अनुरागवात्सल्ययुतवानपि, सन्तानस्यभाविजीवनोन्नतेः उपयुक्ताः विद्याबुद्ध्यादयश्च यदि दीयन्ते तर्हि प्रत्येकः मनुजः युवावस्थायां शारीरक-मानसिकोन्नतिं, सम्यक्ज्ञानं च प्राप्य रघोरिव उन्नतशिखरान् जीवने आरुह्य, वंशप्रतिष्ठां वर्धयतीति विषयः सूक्ष्मेक्षिकतया अत्र निरूपितः। यथा -*

**"सवृत्तचौल श्चलकाकपक्षकै रमात्यपुत्रै स्सवयोभिरन्वितः ।**
**लिपेर्थ थावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ।।"**
**"अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।**
**अवंध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति"** ।।3।। *इति ।*

*तारुण्यावस्थायां प्रविष्टस्य रघोः विवाहसंस्कारं सम्पाद्य, निखिलं राज्यभारं तस्य भुजस्कन्धयोः निक्षिप्य-*

**"स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ।**
**दिनान्ते निहितं तेजः सवित्रेव हुताशनः।।"** ।।4।।

*इतिवत् निश्चिन्तान्तरङ्गस्सन् स दिलीपः सुदक्षिणया सह जीवनान्ते वानप्रस्थाश्रमं स्वीचकार । यदि सन्ततिः वयः परिणतिं प्राप्य, ज्ञानाशक्तिमन्तः समर्थाश्च भवन्ति चेत् माता-पितरौ सर्वाणि कार्यभारनिर्वहणानि स्वापत्यस्य समर्प्य, प्रशान्तचित्तेन शेषजीवनं यापयित्वा, जीवन्मुक्तिमार्गान् अन्विष्य, जन्मसाफल्याय यततेरन् इति विषयः पूर्वोक्तसन्दर्भेण संसूच्यते । विषयोऽयं रघुवंशचक्रवर्तिनाम् आदर्शजीवनवर्णनसन्दर्भेऽपि कालिदासेन सम्यक् वर्णितम् । यथा -*

**"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।"** ।।5।। *इति*

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 3, Issue - 1, Jan-Feb – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 20/01/2020 Accepted on : 02/02/2020 Publication Date: 28/02/2020

1. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* III/श्लोः26
2. *द्रः- भवभूतिमहाकविः - उत्तररामचरितम् -* VI/श्लोः13
3. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* III/श्लोः28, 29
4. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* IV/श्लोः1
5. *द्रः- कालिदासमहाकविः - रघुवंशमहाकाव्यम् -* I/श्लोः8

**उपसंहारः**

*सुदक्षिणा-दिलीपयोः वृत्तस्य सूक्ष्मेक्षिकपरिशीलनेन आदर्शदाम्पत्यजीवनमस्माकं स्पष्टतया दृग्गोचरं भवति । चतुर्विधपुरुषार्थान् साधयितुं गृहस्थाश्रमजीवनं कथं प्रातिपदिकरूपेण उपयुज्यते इति विषयः ज्ञायते। यदि सुदक्षिणा-दिलीपयोरिव लोके दम्पत्यौ उभौ परस्परानुरागतवन्तौ, धार्मिकजीवनरतौ सन्तौ भवतः तर्हि तयोः सन्ततिरपि रघोरिव महोन्नत कीर्तिमाप्नोति। तादृश उन्नतगुणैर्युताः उत्तमपौरजनैः संभरितः समाजः समस्त लोकस्य आदर्शमयो भवेत् ।*

*किन्तु आधुनिककाले युवदम्पत्योर्मध्ये एतादृश आदर्शदाम्पत्यजीवनांशाः लुप्ताः भवन्ति । विवाहबन्धाश्च अत्यधिकतया विच्छिन्नाः भवन्ति ।*

*आबाल्यं माता-पित्रोः मध्ये विद्यमानाः स्पर्धाः दृष्ट्वा, वर्धिताः बाल-बालिकाः मनोवैकल्यभावनापीडिताः भूत्वा आगामिकाले संघविद्रोहशक्तयः इव परिणमन्ति ।*

*अतः एतादृश सामाजिकदोषाणां दूरीकरणाय, महोन्नतजीवनमूल्यभरितानि उत्तमकाव्यानि पठित्वा आदर्शप्रणयजीवनं यापयित्वा, उत्तमादर्श कुटुम्बव्यवस्थां संस्थाप्य, भारतसमाजस्य वैभवं, कीर्तिंच विश्वयवनिकायां प्रकटयामः । इति शम् ।*

**उपयुक्तग्रन्थसूची:**

1. *आचार्य मरिर कृष्णारेड्डि , चतुर्वेदसंहित वैदिकसाहित्यप्रचारसमिति* 2006 *(चतुर्वेदभूमिकासहितमु) हैदराबाद्*-500 060.
2. *महाकवि कालिदासः, रघुवंशमहाकाव्यम्, चौखम्बासुरभारती*
   *(मल्लिनाथकृत सञ्जीवनी, श्री कृष्णमणि त्रिपाठि वाराणसि* 1990 *चन्द्रकला संस्कृत हिन्दी व्याख्यासहितम्)*
3. *भवभूतिः, उत्तररामचरितम् चौखम्बा विद्याभवन्*
   *(संस्कृत - हिन्दी-व्याख्या आनन्दचन्द्रमिश्रः वाराणसि सहितम्)* 1968.